Set-01

# केन्द्रीय विद्यालय संगठनम्

पटना संभागः

## प्रथम सङ्कलनात्मकं – मूल्याङ्कनम् ।

कक्षा – नवमी

विषय – संस्कृतम्

समयः – होरात्रयम् पूर्णाङ्काः – 90

1. प्रश्नपत्रे चत्वारः खण्डाः सन्ति।

खण्डः क – अपठित अवबोधनम् – 10 अङ्काः

खण्डः ख – रचनात्मकं कार्यम् – 15 अङ्काः

खण्डः ग – अनुप्रयुक्त व्याकरणम् – 30 अङ्काः

खण्ड घ – पठित अवबोधनम् – 35 अङ्काः

2. सर्वे प्रश्नाः अनिवार्याः।

3. प्रश्नानाम् उत्तराणि खण्डानुसारं क्रमेणैव लेखनीयनि।

4. प्रश्न संख्या अवश्यं लेखनीया।

5. उत्तराणि संस्कृतेन एव लेखनीयानि।

## खण्डः क

## अपठितं अवबोधनम् – 10

1. अधोलिखितम् अनुच्छेदं पठित्वा प्रश्नानाम् उत्तराणि लिखत –

सूर्यः प्रातः काले पूर्वस्यां दिशायाम् उदेति। प्रातः काले सूर्यस्य प्रकाशः अन्धकारम् अपनयति। तदा प्रकृतेः शोभा अतीव रमणीया भवति। शीतलः मन्दः सुगन्धः च पवनः वहति। खगाः वृक्षेषु मधुरं कूजन्ति। उपवनेषु पुष्पाणि सरोवरेषु च कमलानि विकसन्ति। विकसितानां पुष्पाणामुपरि स्थित्वा भ्रमराः मधुरं गुञ्जन्ति। आश्रमेषु मुनयः स्नानं कृत्वा सूर्यं नमन्ति ईश्वरं च भजन्ति। ग्रामेषु कृषकाः प्रातराशं कृत्वा हल–सहितान् बलीवर्दान् नीत्वा क्षेत्राणि प्रति गच्छन्ति। जनाः उपवनेषु भ्रमणं कुर्वन्ति। छात्राः विद्यालयं गच्छन्ति। ते तत्र पाठान् पठन्ति लेखान् च लिखन्ति।



https://www.evidyarthi.in/

अस्माकं जीवने सूर्यस्य अत्यधिकं महत्त्वमस्ति। अस्यैव प्रकाशे सर्वः व्यवहारः चलति। अस्य दिनपति – रवि – दिनमणि – आदित्य – भास्कर – दिनेश – इत्यादीनि अनेकानि अभिधानानि सन्ति। गायत्रीमन्त्रः अस्यैव स्तुतिं करोति।

प्रश्नाः –

क) एकपदेन उत्तरत – 2

i. सूर्यः कदा उदेति?

ii. सूर्यस्य प्रकाशः कम् अपनयति?

iii. खगाः कुत्र कूजन्ति?

iv. पुष्पाणामुपरि स्थित्वा के मधुरं गुञ्जन्ति?

ख) पूर्णवाक्येन उत्तरत – 2

i. प्रातः काले कृषकाः किं **कुर्वंति**?

ii. मुनयः प्रातः काले किम् आचरन्ति?

ग) निर्देशानुसारम् उत्तरत – 4

प. 'गायत्रीमन्त्रः अस्यैव स्तुतिं करोति' इत्यत्र अस्य सर्वनाम् पदस्य प्रयोगः कस्मै अभवत् ?

अ) चन्द्राय ब) नक्षत्रेभ्यः

स) प्रकाशाय द) सूर्याय

पप. सूर्यस्य पर्यायपदं विकल्पेभ्यः चित्वा लिखत।

अ) रविः ब) प्रकाशः

स) व्यवहारः द) पवनः

पपप. 'रमणीया' इति कस्य पदस्य विशेषणम्?

अ) भ्रमणस्य ब) सूर्यस्य



https://www.evidyarthi.in/

स) शोभायाः			द) उपवनस्य

पअ. 'वहति' इति क्रियायाः कर्तृपदं किम्?

अ) मन्दः			ब) पवनः

स) शीतलः			द) सुगन्धः

घ) अस्य अनुच्छेदस्य एकं समुचितं शीर्षकं लिखत। 2

## खण्डः ख

## रचनात्मकं कार्यम् – 15

2. भवान् गौरवः अस्ति। भवतः मित्रं मयंकः नवमकक्षायां प्रविष्टः। स्वमित्रं नवकक्षायां संस्कृतम् पठितुम् प्रेरयितुं लिखिते पत्रे रिक्तस्थानानि पुरयित्वा उत्तरपुस्तिकायां लिखत – 5

पटनातः

तिथिः ..........

प्रिय मयंक,

i. ..........................

अत्र कशलं तत्रास्तु। तव पत्रात् ज्ञातं यत् त्वम् नवम्कक्षायां ii. ........... पठितुम् इच्छसि। एतत् ज्ञात्वा अहम् अति पसन्नः iii. ................. । यतः संस्कृतं पठित्वा वयं स्वदेशस्य गौरवम् अनुभवितुम् iv. ................ । इयं देवभाषा विश्वस्य सर्वासु भाषासु प्राचीनतमा v. ............... च अस्ति। विश्वस्य vi. .................. भाषासु भारतीयभाषासु च vii. ............... शब्दाः प्राप्यन्ते। किम् त्वं जानासि यत् वेदाः रामायणं महाभारतम्, उपनिषदः पञ्चतन्त्र हितोपदेशादयः viii. ............. संस्कृते एवं लिखिताः सन्ति।

अतः त्वं सर्वैः ix. .................. सह संस्कृतमपि परिश्रमेण पठ। अवकाशेषु मम गृहम् आगच्छ। माता–पितृभ्यां मम प्रणामाः।

तव प्रिय x. ...............

गौरवः

– मञ्जूषा –

| | | | |
|---|---|---|---|
| अभवम्, नमोनमः, | मित्रम्, | संस्कृतम्, | शक्नुमः, |
| वैज्ञानिकी, | विषयैः, संस्कृतस्य, | अनेकासु, | ग्रन्थाः |



https://www.evidyarthi.in/

3. अधः प्रदत्तचित्रं दृष्ट्वा मञ्जूषायां प्रदत्तशब्दानां सहायतया पञ्चवाक्यानि संस्कृते लिखत। 10



– मञ्जूषा –

| | | | | |
|---|---|---|---|---|
| कुटीरे, | मेघाः, | कन्या, | महिला, | सूर्यः, |
| बीजानि, | नदी, | जलम्, | वपन्ति, चटका | |

अथवा

मञ्जूषायाः सहायतया 'अस्माकं विद्यालयः' इति विषयक अधिकृत्य पञ्चवाक्यानि संस्कृते लिखत।

– मञ्जूषा –

| | | | |
|---|---|---|---|
| छात्राः, | कक्षा, | अध्यापिका, | कृष्णफलके, |
| सुधाखण्डः, | पुस्तकानि, | आसनानि, | विद्युतदीपाः, |
| जलपात्रम्, | पाठयन्ति, | रक्षति, स्नेहं, | |
| | उपरि, | हरीतिमा | |



https://www.evidyarthi.in/

<u>खण्डः ग</u>

## अनुप्रयुक्त व्याकरणम् – 30

4. अधोलिखितं निर्देशानुसारम् उत्तरत – 4

i. कः वर्णः तालव्यः अस्ति?

अ) ठ् ब) त्

स) द् द) च्

ii. कः वर्णः दन्त्यः अस्ति?

अ) ब् ब) भ्

स) फ् द) ल्

iii. उचितं वर्णं चित्वा वर्णवियोजने रिक्त स्थानपूर्तिः कुरूत।

कपोतः = क् + अ + प् + ओ + .................. + अः

अ) त् ब) द्

स) ध् द) थ्

iv. उचितं वर्णसंयोजन चिनुत।

स् + इ + द् + ध् + इः

अ) सिदिः ब) सिद्धी

स) सिद्धिः द) सिद्धः

5. अधोलिखित वाक्येषु रेखाङ्क्त्पदानां समुचितं सन्धिं विच्छेदं वा प्रदत्त विकल्पेभ्यः चित्वा लिखत। 5

i. <u>पुस्तकालयं</u> गच्छ।

अ) पुस्तक् + आलयम् ब) पुस्तिका : +लयम्

स) पुस्तकालः +अयम् द) पुसः +तकालयम्

ii. रात्रौ <u>रजनीशः</u> उदयति।


https://www.evidyarthi.in/

अ) रजनि + इशः ब) रजनी + ईश :

स) रजनी + इश द) रजनि + इश :

iii. इति + उक्तः पिता पुत्रम् उवाच।

अ) इत्युक्तः ब) इत्योक्तः

स) इत्यूक्तः द) इतूक्तः

iv. भोजने ममेच्छा नास्ति।

अ) मम + ईच्छा ब) ममे + अच्छा

स) ममा + इच्छा द) मम + इच्छा

v. छात्रः अध्ययने तल्लीन आसीत्।

अ) तद् + लीनः ब) तत् + लीनः

स) तल् + हीनः द) तल्ल :+ ईनः

vi. अस्य नाम जगत् + ईशः अस्ति।

अ) जगतिशः : ब) जगतीशः

स) जगतइशः : द) जगदीशः

vii- शरच्चन्द्रः उपन्यासकारः अस्ति।
अ) शर + चन्द्रः ब) शरत् + चन्द्रः
स) शरन् + चन्द्र द) शरद् + चन्द्रः

viii- वृहस्पतिः वागीशः कथ्यते ।
अ) वागी + इशः ब) वाच् + इशः
स) वागि + इशः द) वाक् + ईशः

ix- मुनिः + अयम आयाति।
अ) मुनिरयम् ब) मुन्ययम्
स) मुनरियम् द) मुनेरयम्

x- तत्र वृक्षोऽस्ति।
अ) वृक्षः : अस्ति ब) वृक्ष + अस्ति
स) वृक्ष : ओस्ति द) वृक्षा + अस्ति

6- क) उचित शब्दरूपाणि चित्वा रिक्तस्थानानि पूरयत। 3

i- श्री रामः ............ पुत्रः अस्ति।
अ) दशरथं ब) दशरथाय



https://www.evidyarthi.in/

स) दशरथस्य    द) दशरथेः

ii- अहं ............... एकं रूप्यकं यच्छामि।

अ) तम्    ब) तेन
स) तस्मात्    द) तस्मै

iii- त्वं ................... करोषि।

अ) कार्या    ब) कार्यम्
स) कार्याणि    द) कार्ये

Vi- ..................... दत्तं क्षीरं मधुरमस्ति।

अ) अहम्    ब) मयि
स) मम    द) मया

V- तस्याः .................. परिधानं सुन्दरम् अस्ति।

अ) महिलाया    ब) महिलायै
स) महिलायाः    द) महिलाम्

vi- ................... प्रातः व्यायामं कुर्मः।

अ) वयम्    ब) यूयम्
स) ते    द) आवाम्

ख) कोष्ठके प्रदत्तशब्दयोः उचितां विभक्तिं प्रयुज्य रिक्तस्थाने पूरयत। 2

i- मम गृहे द्वौ ....................... स्तः। (आम्र वृक्ष)

ii- ........................ सभायाम् प्रवचनं कुर्वन्ति। (विद्वस्)

7- क) उचित धातुरूपाणि चित्वा रिक्तस्थानानि पूरयत। 3

i- वानराः कदलीफनानि ................ ।

अ) भक्षन्ति    ब) भक्षयन्ति
स) भक्षयन्ती    द) भक्षयथः

ii- अहं पितरम् ..................... ।

अ) प्रक्ष्यसि    ब) प्रक्ष्यति
स) प्रक्ष्यामि    द) प्रक्ष्यावः

iii- महिलाः जलम् ..................... ।

अ) आनयथः    ब) आनयन्ति
स) आनयामि    द) आनयति

iv- भो छात्रा सत्यम् ...................... ।

अ) वद    ब) वदतु
स) वदानि    द) वदन्तु

V- युस्मभ्यं फलरसं ........................ ।

अ) रोचन्ते    ब) रोचते
स) रोचध्वे    द) रोचे

vi- परिश्रमिणः जनाः सफलताम् ..................... ।

अ) लभते    ब) लभध्वे
स) लभेते    द) लभन्ते

ख) उचित धातुरूपाणि प्रयुज्य रिक्तस्थानानि पूरयत। 2

i. बालकः मातुः ...................। (भी – लट्लकारे)



https://www.evidyarthi.in/

ii. सः नायकः ..................... । (अस् – लङ्लकारे)

iii. रामः रावणम् ...................... । (हन् – लङ्लकरे)

iv. सा नारी तत्र न ..................... । (गम् – लृट्लकारे)

8. क) पदत्तविकल्पेभ्यः उचितपदं चित्वा रिक्तस्थानानि पूरयत। 3

i. इमम् .................. परितः राजपथम् वर्तते।

अ) विद्यालयस्य ब) विद्यालयात्

स) विद्यालयम् द) विद्यालयाय

ii. कृष्णः .................... अलम्।

अ) कंसम ब) कंसेन

स) कंसात् द) कंसाय

iii. कपयः .................. उपरि क्रीडन्ति।

अ) वृक्षे ब) वृक्षस्य

स) वृक्षात् द) वृक्षं

ख) उचित विभक्ति प्रयोगे वाक्य द्वयं पूरयत। 2

i. ..................... हस्ते वीणा वर्तते। (सरस्वती)

ii. अहम् ..................... उपहारं यच्छामि। (भगिनी)

9. क) प्रदत्त विकल्पेभ्यः उचितम् उत्तरं चित्वा रिक्तस्थानानि पूरयत। 4

i. सर्वं .................... रामः अवदत्। (वि+ज्ञा+ल्यप्)

अ) विज्ञय ब) विज्ञाय

स) विज्ञाल्यप् द) विज्ञ्य

ii. छात्राः .................. (पठितुम्) विद्यालयं गच्छति।


https://www.evidyarthi.in/

अ) पठ्+तुमुन्　　　　ब) पठ्+क्त

स) पठ्+क्त्वा　　　　द) पठ्+क्तुम्

iii. रामं .................... (दृष्ट्वा) सीता अवदत्।

अ) दृष्+क्त्वा　　　　ब) दृष्+कत्वा

स) दृष्+क्तवा　　　　द) दृष्+कत्व

iv. सा स्व मातरं ...................... विद्यालयं गच्छति। (प्र+नम्+ल्यप्)

अ) प्रनम्य　　　　ब) प्रनत्वा

स) प्रणमय्य　　　　द) प्रणम्य

ख) प्रकृतिप्रत्ययौ संयोज्य विभज्य वा लिखत। 2

i. स्वदेशं <u>परित्यज्य</u> कुत्र प्रास्थितः?

ii. वयं भोजनं खाद् + .................. तत्पराः स्म। (खादितुम्)

<u>खण्डः घ</u>

## <u>पठित अवबोधनम् – 35</u>

10. अधोलिखितं गद्यांशं पठित्वा प्रदत्तप्रश्नानाम् उत्तराणि संस्कृतेन लिखत। 5

राजा उवाच – 'भोः भोः पण्डिताः। श्रूयतां ममवचनम् – अस्ति कश्चिद् एवम्भूतो विद्वान् यो मम पुत्राणां नित्यम् उन्मार्ग गामिनाम् अनधिगतशास्त्राणाम् इदानीं नीतिशास्त्रोपदेशेन पुनर्जन्म कारयितुं समर्थः?

अत्रान्तरे विष्णुशर्मानाम महापण्डितः सकल–नीतिशास्त्रतत्वज्ञः वृहस्पतिः इव अब्रवीत् –– "देव! म्हाकुल सम्भूता एते राजपुत्राः तत् मया नीतिं ग्राहयितुं शक्यन्ते। अतोऽहं षण्मासाभ्यन्तरे भवत्पुत्रान् नीतिशास्त्राऽभिज्ञान् करिष्यामि।"

क) एकपदेन उत्तरत – 1

i. कः वृहस्पतिः इव अब्रवीत्?



https://www.evidyarthi.in/

ii. महाकुलसम्भूताः के आसन्?

ख) पूर्णवाक्येन उत्तरत – 2

राजा किम् उवाच?

ग) उचितम् उत्तरं चित्वा लिखत – 2

i. 'यो मम पुत्राणां नित्यम्' अत्र 'मम' इति पदं कस्य कृते प्रयुक्तम्?

अ) विष्णुशर्मणः ब) राज्ञः

स) पुत्राणाम् द) पण्डितानाम्

ii. 'करिष्यामि' इति क्रियापदस्य कर्तृपदं किम्?

अ) अहम् ब) भवत्पुत्रान्

स) षण्मासाभ्यन्तरे द) अभिज्ञान

11. अधोलिखितं पद्यांशं पठित्वा प्रदत्त प्रश्नानाम् उत्तराणि लिखत।

गौरवं प्राप्यते दानात् न तु वित्तस्य सञ्चयात्।
स्थितिरुच्चैः पयोदानां पयोधीनामधः स्थितिः।।

क) एकपदेन उत्तरत – 1

i. दानात् किं प्राप्यते?

ii. केषां स्थितिः अधः भवति?

ख) पूर्णवाक्येन उत्तरत – 2

केषां स्थितिः उच्चैः भवति?

ग) उचितम् उत्तरं चित्वा लिखत। 2

i. 'उच्चैः' इति पदस्य विलोमपदं किम्?

अ) उपरि ब) नीचैः

स) अद्य द) अंतः



https://www.evidyarthi.in/

ii. 'धनस्य' इति पदस्य पर्यायपदं किम्?

अ) वित्तस्य ब) वारि

स) मेघाः द) गौरवम्

12. अधोलिखितं नाट्यांश पठित्वा प्रदत्तप्रश्नाम् उत्तरत।

लक्ष्मणः – बाढम्। (उपेत्य) जयतु आर्यः। आर्य! अयं ते दयितो भ्राता भरतो भातृवत्सलः। संक्रान्तं यत्र ते रूपमादर्शा इव तिश्ठति।।

रामः – वत्स लक्ष्मण! किमेवं भरतः प्राप्तः?

लक्ष्मणः – आर्य अथं किम्?

क) एक पदेन उत्तरत :– 2

i. भरतः कस्य दयितः भ्राता अस्ति?

ii. भातृवत्सलः कः अस्ति?

ख) पूर्ण वाक्येन उत्तरत – 2

'रामस्य रूपं कस्मिन् संक्रान्तम् इव तिश्ठति?

ग) निर्देशानुसारम् उचितम् उत्तरं चित्वा लिखत – 2

i. 'ते रूपम्' अत्र 'ते' इति सर्वनाम पदं कस्मै प्रयुक्तम्?

अ) रामस्य ब) रामाय

स) भरतः द) भरताय

ii. 'समीपं गत्वा' इत्यर्थे समानार्थकं पदं किं प्रयुक्तम्?

अ) उपेत्य ब) दयितः

स) प्राप्तः द) संक्रान्त

13. अधोलिखित श्लोकद्वयस्य भावार्थः मञ्जूषातः उचितपदानि चित्वा पूरयत। 4


https://www.evidyarthi.in/

अ) सद्भिस्तु लीलया प्रोक्तं शिलालिखितमक्षरम्।

असद्भिः शपथेनापि जले लिखितमक्षरम्।।

भावार्थ : – सज्जनः सरलतया i. .................... शिलायाम् ii. ..............

अक्षरम् इव भवति। iii. .................. च समयेन अपि उक्तं

iv. .................. लिखितमक्षरम् इव भवति।

आ) कीटोऽपि सुमनः सङ्गादारोहति सतां शिरः।

अश्मापि याति देवत्वं महद्भिः सुप्रतिष्ठितः।।

भावार्थ : – पुष्पैः सह तुच्छजीवः v. .................. अपि सज्जनानां शिरः

आरोहति। अनेने प्रकारेण मूर्खः अपि vi. .................. भवितुं

शक्नोति। यथा vii. .................. मन्दिरे viii. ......................

अश्मा अपि देवत्वं याति।

– मञ्जूषा –

| | | | |
|---|---|---|---|
| असद्भिः, | प्रतिष्ठितः, | जले, | पूज्यः, |
| कीटः, | प्रोक्तम्, | सज्जनैः, | लिखितम् |

14. अधोलिखित श्लोकयोः अन्वयं मञ्जूषातः समुचित पदानि चित्वा पूरयत। 4

अ) अनेकसंशयोच्छेदि परोक्षार्थस्य दर्शकम्।

सर्वस्य लोचनं शास्त्रं यस्य नास्त्यन्ध एव सः।।

अन्वयः – अनेकसंशयोच्छेदि परोक्षार्थस्य i. .................... शास्त्रं सर्वस्य

ii. .................. भवति। एतत् यस्य न iii. ........................

सः iv. ...................... एव अस्ति।

आ) गच्छन् पिपीलको याति योजनानां शतान्यपि।

अगच्छन् वैनतेयोऽपि पदमेकं न गच्छति।।



https://www.evidyarthi.in/

अन्वयः – गच्छन् v. ...................... योजनानां vi. ...................... अपि

याति। vii. ...................... वैनतेयः एकं viii. ......................

अपि न गच्छति।

– मञ्जूषा –

| | | | |
|---|---|---|---|
| अस्ति, | दर्शकम्, | अन्धः, | अगच्छन्, |
| लोचनम्, | शतानि, पदम्, | पिपीलकः | |

15. रेखाङ्कितपदानि आधृत्य उचितं पदं चित्वा प्रश्ननिर्माणं कुरूत – 4

i. <u>उज्जयिन्याम्</u> माधवः नाम विप्रः अस्ति।

अ) कदा　　ब) कुत्र
स) कथं　　द) कस्मिन्

ii. <u>श्रीरामः</u> सत्यपुरूषः आसीत्।

अ) कः　　ब) कीदृशः
स) कथम्　　द) का

iii. <u>अविवेकता</u> अनर्थाय भवति।

अ) किम्　　ब) का
स) कः　　द) काम्

iv. <u>चञ्चलं</u> मनः न अनुभ्रामयेत्।

अ) कः　　ब) केन
स) किम्　　द) का

16. अधोलिखित वाक्यानि कथाक्रमेण संयोज्य लिखत। 4

i. नकुलस्य मुखं पादाः च रक्तेन विलिप्ताः भवन्ति।


evidyarthi
https://www.evidyarthi.in/

ii. स ब्राहमणः नकुलं बालरक्षायाम् स्थापयति।

iii. उज्जयिन्यां माधवः नाम विप्रः वसति।

iv. ब्राहमणः श्राद्धार्थं राज्ञा निमन्त्रितः भवति।

v. ब्राहमणः नकुलं हत्वा आत्मानं मुशितं मन्यते।

vi. ब्राहमणी शिशोः रक्षार्थं ब्राहमणं नियोज्य स्नातुं गच्छति।

vii. नकुलः समीपम् आगच्छन्तं कृष्णसर्पं मारयति।

viii. ब्राहमणः 'नकुलेन मे पुत्रः खादितः' इति चिन्तयति।

17. क) प्रसङ्गानुसारं रेखाङ्क्तिपदयोः उचितम् अर्थं चित्वा लिखत। 2

i. न्यग्रोधफलम् आहर ।

अ) चोरय ब) गृहाण

स) आनय द) नय

ii. अयं ते दयितो भ्राता भरतो भ्रातृवत्सलः ।

अ) दयाशीलः ब) प्रियः

स) भ्रातृप्रियः द) अनुजः

ख) शब्दानाम् अर्थैः सह मेलनं कुरुत। 2

| | |
|---|---|
| i. देहम् | समीपम् आगत्य |
| ii. सिद्धौ | समाप्तिः |
| iii. अवसानम् | शरीरम् |



https://www.evidyarthi.in/

iv. उपेत्य सफलतायाम्

--------------------------------



https://www.evidyarthi.in/